# संस्कृत-वार्ता:

दिनाङ्क : 10/12/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- राष्ट्रपतिः द्रौपदी मुर्मु: उक्तवती यत् भारतं तत् राष्ट्रं भवितुमर्हति यत्र मानवाधिकाराणां न केवलं रक्षणं भवति, अपि च तेषां सम्मानं भवति।
- भारतस्य प्रमुख-सांस्कृतिक-आध्यात्मिक-महोत्सवेषु अन्यतमः दीपावली पर्व अद्य यूनेस्को-इत्याख्यायाः अमूर्त-सांस्कृतिक-सूच्यां समाविष्टः ।
- अमरीकादेशस्य बृहत् टेक्-जायन्ट् अमेज़न इत्यनेन समवायेन त्रिंशत्यधिक-द्विसहस्र-तमवर्ष-पर्यन्तं भारते पञ्चत्रिंशत् कोटि रूप्यकाणां निवेशस्य घोषणा कृता।
- बेल्जियमदेशस्य सर्वोच्चन्यायालयेन भारतीय पलायकः मेहुलचौकसी इत्येतस्य प्रत्यर्पणस्य याचिका निरस्तीकृता।
- चेन्नई–नगरे सञ्जातायां स्क्वैश- विश्वकप-स्पर्धाया: पूल्–बी इति वर्गे भारतदलेन स्विट्ज़रलैण्ड्–दलं चत्वारि-शून्यं इत्यंकतरालै: पराजित्य उत्कृष्टः आरम्भः कृतः।

---

<u>मानवाधिकार दिवस</u>

राष्ट्रपतिः द्रौपदी मुर्मु: उक्तवती यत् भारतं तत् राष्ट्रं भवितुमर्हति यत्र मानवाधिकाराणां न केवलं रक्षणं भवति, अपि च तेषां सम्मानं भवति। मानवाधिकारदिवसमाधृत्य राष्ट्रियसम्मेलनं सम्बोधितवती राष्ट्रपतिः अवदत् यत् गरिमायाः विषयः सर्वोपरि वर्तते। सा प्रोक्तवती यत् मानवाधिकारदिवसः न्यायपूर्णस्य, समानतायाः, सुसमाजस्य च पृष्ठभूमिं सृजति। सा अवदत् यत् न्यायं प्राप्तुं सर्वेषां जनानां जन्माधिकारः भवेत्।

राष्ट्रपतिः प्रोक्तवती यत् भारतस्य मानवाधिकारस्य वैश्विकरूपरेखायाः स्वरूपीकरणे महती भूमिका अस्ति। सा उल्लेखितवती यत् संविधानसभायाः पञ्चदश महिलासु एका हन्सा मेहता सार्वभौमिक मानवाधिकारस्य घोषणापत्रम् सज्जीकर्तुं महत्त्वपूर्णां भूमिकां निर्वहत्। राष्ट्रपतिः

अवदत् यत् देशस्य स्वतन्त्रता सेनानिनः मानवीयगौरवस्य, समानतायाः, न्यायस्य चाधृत्य विश्वस्य कल्पना विहिता। सा प्रकाशितवती यत् विभिन्नानां प्रभावि योजनानां, आर्थिकसहभागितायाः, महिलानां गरिमायाः च माध्यमेन देशस्य आत्मनिर्भरता सुदृढा जाता । ध्येयास्पदं वर्तते यत् दिसम्बरमासस्य दश दिनाङ्के प्रतिवर्षं मानवाधिकारदिवसः आचर्यते ।

---------------------------------------------------

## यूनेस्को-दीपावली

भारतस्य प्रमुख-सांस्कृतिक-आध्यात्मिक-महोत्सवेषु अन्यतमः दीपावली पर्व अद्य यूनेस्को-इत्याख्यायाः अमूर्त-सांस्कृतिक-सूच्यां समाविष्टः । अस्मिन् अवसरे संस्कृति-पर्यटन-मन्त्री गजेन्द्र-सिंह-शेखावतः अवदत् यत् प्रत्येकस्य भारतीयस्य कृते एषः भावनात्मकः समयः वर्तते । गृहमंत्री अमितशाहः, केंद्रीयमंत्री जगतप्रकाश नड्डा चोभौ अद्य दीपावली पर्वणः यूनेस्को इत्याख्यायाः अमूर्त सांस्कृतिक धरोहरस्य प्रतिनिधि सूच्यां समाविष्टे सति प्रसन्नतां प्रकटितवन्तौ । अन्तर्जालीय सामाजिक संदेश माध्यमेन श्री शाहः प्रोक्तवान् यत् एषा मान्यता आधुनिक युगे अपि भारतस्य प्राचीनं सांस्कृतिकं महत्वं प्रकटयति। अपरत्र श्री नड्डा प्रोक्तवान् यत् एष: गर्वस्य विषयः अस्ति। अस्मिन् अवसरे विदेशमंत्री एस. जयशंकरः प्रोक्तवान् यत् यूनेस्को इत्याख्यायाः अमूर्त-सांस्कृतिक धरोहरे 'दीपावली' इत्येतस्य पर्वणः समावेशः सांस्कृतिक-धार्मिक-आध्यात्मिक-महत्वस्य च मान्यता वर्तते । सः जनान् एकत्रीकर्तुं एतस्य पर्वण: महत्वं अपि प्रकाशितम्।

---------------------------------------------------

## दीपावली

जीवन्तस्य जनकेन्द्रितस्य उत्सवस्य च स्वरूपस्य उपरि बलं प्रदध्यौ मन्त्रिणा प्रोक्तं यत् दीपावली-महोत्सवः कोटिशः जनानां योगदानेन वर्धते। तेषु पारम्परिकदीप-निर्मातृणः कुम्भकाराः, उत्सव-अलङ्करण-निर्मातृणः शिल्पिनः, कृषकाः, मिष्टान्न-निर्मातृणः, पुरोहिताः, युगानुयुगे परम्पराः धारयन्तः परिवाराः च अन्तर्भवन्ति। दक्षिणपूर्व-एशिया, अफ्रीका, खाड़ी-देशेषु, यूरोपे, कैरेबियन-देशेषु च आयोजनैः दीपावल्याः

सन्देशं सर्वेषु महाद्वीपेषु प्रसारितवन्तः इति भारतीय-प्रवासीजनानां भूमिकां अपि श्री-शेखावत्-वर्यः प्राशंसत्।

-----------------------------------------------------

## अमेज़न

अमरीकादेशस्य बृहत् टेक्-जायन्ट् अमेज़न इत्यनेन समवायेन त्रिंशत्यधिक-द्विसहस्र-तमवर्ष-पर्यन्तं भारते पञ्चत्रिंशत्कोटि-रूप्यकाणां निवेशस्य घोषणा कृता। अद्य नवदिल्ल्यां आयोजितस्य अमेज़न-संभव-शिखर-सम्मेलनस्य षष्ठे संस्करणे अमेज़न-संस्थायाः वरिष्ठोपाध्यक्षेन अमित अग्रवालेन एषा घोषणा कृता। तेन प्रोक्तं यत् अयं निवेशः अमेज़न-संस्थायाः वृद्धिं विकसित-भारतस्य च दृष्टिं संयोजयति। अनेन दशलक्षं अतिरिक्तानि प्रत्यक्ष-अप्रत्यक्ष-कार्यस्थानानि अपि सृज्यन्ते। अस्य निवेशस्य केन्द्रबिन्दवः भविष्यन्ति-कृत्रिमबुद्धिमत्ता-क्षमतावर्धनम्,तार्किक-संरचनायाःउन्नतीकरणम्, उद्योग-पर्यावरणस्य निर्माणमिति।

-----------------------------------------------------

## विक्रम मिसरी

विदेशसचिवः विक्रममिसरी अमरीकादेशस्य उपव्यापारप्रतिनिधिना रिक-स्विट्जर इत्यनेन सह मिलितवान्। उभाभ्यां नेतृभ्यां भारत-अमरीका-आर्थिक-प्रौद्योगिकी-सहभागित्वम्, वर्तमान-व्यापार-वार्ताः, उभयदेशयोः मध्ये व्यापारस्य, सशक्त-आपूर्तिशृङ्खलायाः च प्रोत्साहनाय अवसराश्च विस्तरेण चर्चिताः।

-----------------------------------------------------

## मेहुलचौकसी

बेल्जियमदेशस्य सर्वोच्चन्यायालयेन भारतीय पलायकः मेहुलचौकसी इत्येतस्य प्रत्यर्पणस्य याचिका निरस्तीकृता। एण्टवर्प्-नगरे स्वस्य निगडनं विरुद्धं चौकसी इत्येतस्य अनुरोधमाधृत्य बेल्जियम देशस्य ब्रुसेल्स राजधान्याः कोर्ट ऑफ कैसेशन इत्यनेन न्यायालयेन ह्यः वादश्रवणं विहितम् सहैव भारतस्य पक्षे निर्णयः श्रावितः। ध्येयास्पदं वर्तते यत् चौकसीवर्याय

अष्टादशाधिक-द्वि-सहस्रतम-वर्षात् द्वाविंशत्यधिक-द्विसहस्रतम-वर्षं-यावत् षण्णाम् बैंकानां त्रयोदश-कोटि-रूप्यकाणां भ्रष्टाचारस्य आरोपः वर्तते।

-----------------------------------------------------

**स्वास्थ्यमन्त्रालयः**

केन्द्रीय-स्वास्थ्यमन्त्रालयेन विश्वस्वास्थ्य-सङ्घटनेन सह सहभागितां विधाय अद्य नवदिल्ल्याम् महिलानां बालिकानां च स्वास्थ्यम् तथा सुजीवनम् अधिकृत्य मासात्मकः दिल्ली-मेट्रो-अभियानम् प्रचालितम्। स्वास्थ्यपरिवार-कल्याणमन्त्रालयेन कथितं यत् अस्याभियानस्य उद्देश्यम् अस्ति यत् मेट्रो-यानेषु तथा केषुचित् स्थानकेषु प्रदर्शितानां सन्देशानां माध्यमेन लक्षशः यात्रिकाः जागरुकाः भवेयुरिति।

-----------------------------------------------------

**जयपुर**

अद्य जयपुर-नगरे राजस्थान- प्रवासी-दिवसः आचर्यते। अस्मिन् उत्सवे भारतस्य विभिन्न-राज्येभ्यः विदेशेभ्यश्च आगताः प्रवासिनः राजस्थानस्य प्रवासीदिवसमालक्ष्य सहभागित्वं कुर्वन्ति। अस्य उत्सवस्य प्रमुखोऽभिप्रायः अस्ति यत् प्रवासी-राजस्थान-निवासिनां स्वसंस्कृतिमूलैः सह सम्बन्धं सुदृढं कर्तुं च तेषां राज्य-विकासे योगदानम् प्रदातुं सुनिश्चितं वर्तते। उद्घाटन-समारोहे भाषमाणः मुख्यमन्त्री भजनलाल-शर्मा अवदत् यत् राजस्थाने व्यापार-उद्योगयोः कृते अपारं सामर्थ्यम् विद्यते।

-----------------------------------------------------

**स्क्वैश**

चेन्नई–नगरे सञ्जातायां स्क्वैश- विश्वकप-स्पर्धायाः पूल्–बी इति वर्गे भारतदलेन स्विट्ज़रलैण्ड्–दलं चत्वारि-शून्यं इत्यंकतरालैः पराजित्य उत्कृष्टः आरम्भः कृतः।

।। इति वार्ताः ।।